# पाठः - ३ दर्शनानि

## आमुखम्

प्रेक्षणार्थात् दृश् धातोः (दृशिर् प्रेक्षणे) ल्युट् प्रत्यये कृते दर्शनशब्दो निष्पद्यते। किं नाम दर्शनम्? दृश्यते अनेन इति दर्शनम्। येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, ब्रह्मा, जीवात्मा इत्यादयः याथातथ्येन दृश्यते, निरीक्ष्यते, विविच्यते च तद् दर्शनम्। अतः समग्रमपि आध्यात्मिकम् आदिभौतिकं च विवेचनं दशर्नशब्दान्तर्गतं भवति। तत्वार्थदर्शनमेव दर्शनम् इत्यवगन्तव्यम्।

भारतीयदर्शनानि द्विधा विभज्यन्ते- आस्तिकदर्शनानि, नास्तिकदर्शनानि च। यानि दर्शनानि वेदानां प्रामाण्यम् अङ्गीकुर्वन्ति तानि आस्तिकदर्शनानि, यानि च वेदानां प्रामाण्यं न अङ्गीकुर्वन्ति तानि नास्तिकदर्शनानि। तत्र न्याय, वैशेषिक,सांख्य, योग, पूर्वमीमांसा, उत्तरमीमांसा इत्यादीनि षड्दर्शनानि अस्तिकानि। चार्वाक ,बौध्द, जैन, दर्शनानि नास्तिकानि।

| आशयाः / धारणाः व्यवहाररूपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| उपन्यासं पठित्वा ज्ञान सम्पादनम्। पदानि अर्थान् च विवेचयति। लघुटिप्पणीं लिखति। विग्रहवाक्यानि वदति, लिखति च। | नूतनपदानाम् अर्थानां च लेखनम्। विग्रहवाक्यलेखनम् अवतारणं च। लकारपरिचायनं, लट्, लङ्, लोट् लकारयुक्तानां क्रियापदानां लेखनम्। प्रश्नोत्तररीत्या आशयवबोधनेन लघुटिप्पणीलेखनम्। | क्लिष्टपदानि उच्चारयति। विग्रहवाक्यानि वदति, लिखति च। उपन्यासं पठित्वा टिप्पणीं लिखति। |

| | | |
|---|---|---|
| उद्देश्यम् | - | दर्शनान्यधिकृत्य ज्ञानम्। |
| पठननैपुणी | - | भाषणं, लेखनं, दर्शनानां विवेचनं च। |
| आधारग्रन्थसूची | - | अमरभारती, डो.पी.वि. रामन्कुट्टि। |
| | - | भारतीयचिन्ता, के. दामोदरन्। |
| | - | भारतीयदर्शनङ्ल्, डो. एस्. राधकृष्णन्। |
| | - | तत्वमसि, डो. सुकुमार् अषीक्कोट्। |
| कालांशः | - | १० |
| **प्रवर्तनम्** | **-** | **१ लट्लकारक्रियापदचयनम्।** |
| **उद्देश्यम्** | **-** | **वर्तमानकालक्रियापदानां परिचायनम्।** |

**प्रक्रिया**

अध्यापकः कक्ष्यां प्रविश्य छात्रान् सङ्घान् कृत्वा पाठभागस्य वाचनाय निर्दिशतु। पाठभागे विद्यामानानां क्रियारूपाणां लेखनाय निर्दिशतु। अनन्तरं क्रियापदानां समूहात् लट् (वर्तमानकाल) क्रियारूपाणां चित्वा लेखनाय निर्दिशतु। अध्यापकः शुद्धरूपाणि श्यामफलके लिखतु। मूल्यनिर्णयमपि करोतु। टिप्पणिपुस्तके लिखन्तु छात्राः।

**मूल्यनिर्णयसूचिकाः**

पाठभागस्य वाचनम्।

क्रियापदानां चयनम्।

निर्दिष्टलकाररूपाणां विवेचनम्।

लट् रूपाणि - उद्घोषयति, विवृणोति, भवति, अस्ति, प्रचलन्ति, सूचयति।

**प्रवर्तनम् - २ अव्ययपदानि चित्वा वाक्ययोजनम्।**

**उद्देश्यम् - अव्ययज्ञानम्।**

**प्रक्रिया**

अध्यापकः छात्रान् सङ्घद्वयं कृत्वा प्रथमपाठं प्रथमसङ्घाय द्वितीयपाठं द्वितीयसङ्घाय च दत्वा पाठभागस्थानां अव्ययपदानां चित्वा लेखनाय निर्दिशतु।

अव्ययपदानि - एव, अतः, यत्र-तत्र, इति, कुतः।

**मूल्यनिर्णयसूचिकाः**

अर्थग्रहणम्।

अव्ययस्वरूपज्ञानम्।

पदबोधः।

वाक्यघटना।

उत्तराणि

| | |
|---|---|
| एव - | पठनमेव मम लक्ष्यम्। |
| अद्य – | अद्य विरामदिनं भवति। |
| अतः | अद्य मम जन्मदिनं भवति अतः देवालयं गच्छामि। |
| यत्र-तत्र | यत्र शर्करा भवति तत्र पिपीलिका आगच्छन्ति। |
| इति | अहिंसा परमो धर्मः इति गान्धिमहाशयस्य अभिप्रायः। |
| कुतः | त्वं कुतः कक्ष्यायां विलम्बेन आगच्छसि? |
| | त्वं कुतः आगच्छसि? |

**पठनप्रवर्तनम् - ३  उपन्यासं पठित्वा दर्शनानि तेषां उपज्ञातॄन् च अधिकृत्य पट्टिकाकरणम्।**

**उद्देश्यम्** - **दर्शनानि दार्शनिकान् च अधिकृत्य ज्ञानम्।**

**प्रक्रिया** - अध्यापकः ग्रन्थानां ग्रन्थकर्तॄणां च नामानि कर्गजखण्डे विलिख्य छात्रेभ्यः ददातु। येषां हस्ते कर्तॄणां नामानि प्राप्तानि ते एकः वर्गः, अवशिष्टाः द्वितीयवर्गः इत्यादिरूपेण सङ्घद्वयं करणीयम्। ततः अध्यापकः कर्तृसङ्घात् एकम् आहूय कर्गजखण्डे लिखितस्य नाम्नः श्यामफलके लेखनाय निर्दिशतु। एकः संघः कर्तुः ग्रन्थस्य नाम द्वितीयं संघं पृच्छतु द्वितीयसङ्घः उत्तरं वदतु । अध्यापकः उचितं साहाय्यं ददातु। एवं रीत्या उक्तानि कर्तॄणां ग्रन्थानां च नामानि श्यामफलके लिखतु।

ततः छात्राः निर्दिष्टसंघे उपविश्य उपन्यासं सम्यक् पठित्वा दर्शनानां दार्शनिकानां च नामानि विविच्य वदन्तु, टिप्पणीपुस्तके लिखन्तु। अध्यापकः मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचिकाः**

उपन्यासपठनम्।

विवेचनम्।

पट्टिकाकरणम्।

उत्तराणि

सांख्यं - कपिलमुनिः।

योगः - पतञ्जलिमहर्षिः।

वैशेषिकं - कणादः।

न्यायः - गौतमः।

पूर्वमीमांसा - जैमिनिमहर्षिः।

उत्तरमीमांसा - बादरायणः।

चार्वाकदर्शनं - बृहस्पतिः।

बौद्धदर्शनं - गौतमबुद्धः।

जैनदर्शनं - वर्धमानमहावीरः।

**पठनप्रवर्तनम् - ४ उपन्यासं पठित्वा आस्तिकनास्तिकदर्शनानि अधिकृत्य लघूपन्यासलेखनम्।**

**उद्देश्यम् - आस्तिकनास्तिकदर्शनान्यधिकृत्य ज्ञानम्।**

**प्रक्रिया -**

छात्राः उपन्यासं पठित्वा आस्तिकनास्तिकदर्शनानि अधिकृत्य चर्चां कुर्वन्तु। दर्शनानि विवेचयन्तु। उपन्यासलेखनावसरे शीर्षकलेखनम्, विषयमधिकृत्य आमुखे सूचना, खण्डिकाकरणम्, आशयानां क्रमीकरणम्, उपसंहारः, एते अंशाः स्वीकर्तव्याः। लिखितम् उपन्यासं वर्गे अवतारयितुं छात्राणां अवसरः देयः। अध्यापकः उचितं साहाय्यं ददातु।

**मूल्यनिर्णयसूचिका:**

आशयावगमनम्।

विविच्य ज्ञानम्।

वाक्यघटना।

**अधिकवाचनांशः**

दर्शनस्य लक्षणम्

दृश्यतेऽस्य प्रपञ्चस्य मूलकारणमच्युतः।
ज्ञानविज्ञानरूपोऽसौ येन तद्दर्शिनां मतम्।।

सत्कार्यवादः - सति कारणे कार्यं वर्तते इति वादः। लक्षणं तु-

असदकरणादुपादानग्रहणात् सर्वसंभवासंभवात्।
शक्तस्य अशक्यकरणात् कारणाभावाच्च सत्कार्यम्।।

संख्यासंबन्धि सांख्यम्। सांख्ये पञ्चविंशति तत्वानि सन्ति। पुरुषः, प्रकृतिः, पञ्चतन्मात्राः,पञ्चज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनः, पञ्चमहाभूताः च भवन्ति।

वैशेषिकाः षट्पदार्थान् अङ्गीकुर्वन्ति। ते तु द्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, समवायः चेति।

नित्यद्रव्यवृत्तयो व्यावर्तकाः विशेषाः।

विशेषः- speciality (particularity)

कार्यकारणवादः - कारणे कार्यम् अस्ति इति वादः।

नैयायिकाः षोडश पदार्थान् अङ्गीकुर्वन्ति। प्रमाण- प्रमेय- संशय- प्रयोजन- दृष्टान्त-

सिद्धान्त- अवयव- तर्क- निर्णय- वाद- जल्प- वितण्डा- हेत्वाभास- जाति- निग्रहस्थानानि।

जैमिनि कृतिः भवति द्वादशाध्यायी(जैमिनीयसूत्राणि)।

द्वैतसिद्धान्तः - माध्वाचार्यः।

अद्वैतसिद्धान्तः - शङ्कराचार्यः।

विशिष्टाद्वैतसिद्धान्तः - रामानुजाचार्यः।

चार्वाकदर्शनस्य अपरं नाम भवति लोकायतदर्शनम्।

चित्तवृत्तिनिरोधः योगः। योगे अष्टाङ्गानि सन्ति। तानि यम- नियम- आसन- प्राणायाम- प्रत्याहार- धारणा- ध्यान- समाधयः।

उत्तरमीमांसायां (वेदान्ते) प्रसिद्धानि महावाक्यानि-

प्रज्ञानं ब्रह्म, अयमात्मा ब्रह्म, तत्त्वमसि, अहं ब्रह्मास्मि च भवन्ति।